Reg. No. [ | | | | | | | | | ]

# BCMSKL 153

**Credit Based Second Semester B.Com. Degree**
**Examination, September 2022**
**(2018 – 19 and Earlier Batches)**
**SANSKRIT LANGUAGE**

Time : 3 Hours                                                                 Max. Marks : 80

*सूचना : 1) **संस्कृत**भाषया, **कर्णाटक**भाषया, **आङ्ग्ल**भाषया वा उत्तराणि लिखत ।*

*2) प्रश्नसङ्ख्या **4** तथा **5** एतयोः उत्तराणि **संस्कृत**भाषया एव लेखनीयानि ।*

1. अधोनिर्दिष्टपद्यभागेषु **द्वयोः** भाषान्तरं विलिख्य विवृणुत । **(2×5=10)**

1.1) विपदि धैर्यम् अथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिः व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

1.2) विधाय विध्वंसमनात्मनीनं शमैकवृत्तेः भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ।।

1.3) श्रूयते हि कपोतेन शत्रुः शरणमागतः ।
अर्चितश्च यथान्याय्यं स्वैश्च मांसैः निमन्त्रितः ।।

2. अधोनिर्दिष्टेषु **पञ्चानां** वाक्यानां ससन्दर्भं विवरणं लिखत । **(5×3=15)**

2.1) मोहं विधत्ते विषयाभिलाषः ।

2.2) क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।

2.3) मे भिन्ना प्रकृतिरष्टधा ।

2.4) कपयस्तत् खण्डशोऽखण्डयन् ।

**P.T.O.**

2.5) सोऽक्षयं नरकं व्रजेत् ।

2.6) ताडनार्थम् उदरास्ययोरपि ।

2.7) न शक्यम् ईदृशं वक्तुं यदुवाच हरीश्वरः ।

3. **चतुर्णां** प्रश्नानाम् उत्तरं प्रबन्धरूपेण लिखत । **(4×8=32)**

3.1) 'नीतिशतकं' – इति पाठे उक्तानां नीतीनां विषये प्रबन्धं रचयत ।

3.2) 'सन्दर्शनं लोकगुरोः अमोघम्' इति पाठस्य सारांशं निरूपयत ।

3.3) यक्षेण प्रेषितानि सन्देशवचनानि विवृणुत ।

3.4) भगवान् श्रीकृष्णः निजस्वरूपं कथं वर्णयति ?

3.5) कविः दारिद्र्यस्य महिमानं कथं वर्णयति ?

3.6) 'यक्षप्रश्नः' इति पाठस्य सारांशं विवृणुत ।

4. **द्वयोः** संस्कृतभाषया टिप्पणीं रचयत । **(2×4=8)**

4.1) महाभारतम् ।

4.2) मेघदूतम् ।

4.3) भर्तृहरिकविः ।

4.4) कपोतवृत्तान्तः ।

5. निर्देशानुसारं **पञ्चदशवाक्यानि** पूरयत । **(15×1=15)**

अ) रेखाङ्कितस्य पदस्य कारकं सूचरत ।

5.1) पुरा कृतानि पुण्यानि रक्षन्ति । (कर्तृ, कर्म, करणम्)

5.2) अङ्गुल्यग्रेण तान् हन्याम् । (कर्तृ, कर्म, करणम्)

5.3) अहं माहिषं दधि पिबामि । (सम्प्रदानम्, कर्म, करणम्)

5.4) अभयं सर्वभूतेभ्यो ददामि । (सम्प्रदानम्, अपादानम्, करणम्)

5.5) विष्णुः भुजगशयनात् उत्थितः । (सम्प्रदानम्, अपादानम्, अधिकरणम्)

आ) समासनाम निर्दिशत ।

5.6) प्रणयेन कुपिता । (कर्मधारयः, तत्पुरुषः, बहुव्रीहिः)

5.7) पृथ्वी शय्या यस्य सः । (कर्मधारयः, बहुव्रीहिः, द्वन्द्वः)

5.8) चतुर्णां विधानां समाहारः । (द्विगुः, कर्मधारयः, द्वन्द्वः)

5.9) महान् च असौ आत्मा च । (कर्मधारयः, बहुव्रीहिः, अव्ययीभावः)

5.10) न सहिष्णुता । (नञ् तत्पुरुषः, बहुव्रीहिः, अव्ययीभावः)

इ) समुचितं कृदन्तपदं पूरयत ।

5.11) अभवत् ____________ मम मनः । (अवलिप्ता, अवलिप्तः, अवलिप्तम्)

5.12) तत् शीघ्रं ____________ अर्हसि । (उक्त्वा, वक्तुं, वचनीयम्)

5.13) मां ___________ धनिना रमस्व । (त्यक्तव्यं, त्यक्तुं, त्यक्त्वा)

5.14) अन्यैः _____________ धनं शाकाय स्यात् । (दीयमानं, दीयमाना, दीयमानः)

5.15) अज्ञः सुखम् ______________ । (आराध्यम्, आराध्या, आराध्यः)

ई) समुचितं तद्धितपदं सूचयत ।

5.16) धीरस्य भावः ____________ । (धीरः, धैर्यं, धैर्यता)

5.17) जमदग्नेः अपत्यं पुमान् ___________ । (जामदग्न्यः, जमदग्नी, जमदग्निः)

5.18) पटोः भावः ___________ । (पाटवत्वं, पाटवता, पाटवम्)

5.19) जह्नोः अपत्यं स्त्री ____________ । (जह्नुः, जाह्नवी, जह्नुना)

5.20) करुणस्य भावः ____________ । (करुणा, कारुण्यं, कारुण्यत्वम्)